माण्डूक्योपनिषत्

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैः स्तुष्टवांसस्तनुभिः व्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाःस्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

अन्वय :

हे देवा! (वयं), कर्णेभिः भद्रं शृणुयाम, हे यजत्राः, (वयं), अक्षभिः भद्रं पश्येम, (वयं), तुष्टुवांसः(स्तुवन्तः), स्थिरैः अङ्गैः तनुभिः, यत् आयुः, देवहितं व्यशेम(प्राप्नुयाम)। वृद्धश्रवा इन्द्रः, नः(अस्मभ्यं), स्वस्ति(दधातु), विश्ववेदाः पूषा(सूर्यः), नः(अस्मभ्यं), स्वस्ति(दधातु), ताक्ष्यः अरिष्टनेमिः(गरुडः), नः(अस्मभ्यं), स्वस्ति(दधातु), बृहस्पतिः, नः(अस्मभ्यं), स्वस्ति (दधातु)।

भद्रम्.....(ad.), (भन्द्-रक्) भन्द्-to make fortunate 1A set
auspicious
कर्णेभिः.....कर्णः(M.)instru.pl. (छान्दसम्), आकर्ण्यते अनेन-इति-कर्ण , कर्ण्--to hear 10U
with the help of ear
शृणुयाम.....शृ 1st per.pl.pot.mood विधि-लिङ्
शृ-to hear 1PP anit (In active voice it goes into 5th conj.) शृ शृवः च। ३.४.११३
may we hear
देवाः..... ....देवः(M.)nom.pl., (दिव्-अच्), दिव्-to shine 4p
O, effulgents
पश्येम..... दृश् 1st per.pl.pot.mood विधि-लिङ्, दृश्--to see 1P Anit
may we see
अक्षभिः.....अक्षन् (N.) inst.pl.
with the help of eyes
यजत्राः.....यजत्रः(M.)voc.pl. , यजत्रं त्रायते इति-यजत्रः
O, protectors of rituals
स्थिरैः.....(ad.) स्थिरः(M.) instr.pl., (स्था-किरच्), स्था-to stand 1P
with healthy
अङ्गैः.....अङ्गम्(N.)instr.pl.,(अङ्ग्-अच्), अङ्ग्-to go 10P
with limbs
तुष्टुवांसः.....(ad.) तुष्टुवस् (M.)nom.pl., (स्तु-स्तु-क्वसु), स्तु-to praise 2P
while praising
तनूभिः.....तनू(F.)instr.pl., (तन्-उ), तन्-to spread 8U
by the bodies
व्यशेम..... वि-विश् 1st per.pl.po.mood विधि-लिङ्ग (छान्दसम्), वि-विश्-to enter 6P anit
may we enjoy
देवहितम्.....(ad.) देवहितम्(N.)acc.sing., (देवानां हितम्-ष.तत्पु.), (दिव्-अच्), (धा-क्त)
beneficial to the Gods
यत्.....(Re.pro.) यत्(N.)acc.sing.
that
आयुः.....आयुस्(N.)acc.sing., (आ-इ-उस्) इ-to go 2P
a life

स्वस्ति.....indeclinable
auspicious
नः.....(per.pro.) अस्मद् dat.pl. second form of अस्मभ्यम्, (अस्--मदिक्) अस्- to be 2P set to us
इन्द्रः.....इन्द्रः(M.) nom.sing., इन्दति इति इन्द्रः, (इन्द्-रन्) इदि-to have great power 1P
one who has a great power
वृद्धश्रवाः.....(ad.) वृद्धश्रवस् (M.)nom.sing.,(वृद्धः श्रवस् यस्य सः-ब.व्री.), (वृद्ध्-क्त) (श्रु-असि)
one whose fame is well known
पूषा.....पूषन् (M.)nom.sing., (पूष्-कनिन्) पूष्--to nurture 4Pset
The sun
विश्ववेदाः.....(ad.) विश्ववेदस् (M.)nom.sing., (विश्वं सर्वं जानाति वेत्ति -उप.तत्पु.)
one who knows everything
तार्क्ष्यः.....तार्क्ष्यः(M.)nom.sing., (तृक्ष-अण्=तार्क्ष-ष्यञ्) तृक्ष्-to go 1P
Garuda
अरिष्टनेमिः..... (ad.) अरिष्टनेमिः(M.)nom.sing., (अरिष्यत् अकुण्ठित् गतिः यस्य-ब.व्री.)
unobstructed movement
बृहस्पतिः.....बृहस्पतिः(M.) nom.sing., (बृहतः वाचः पतिः)
Guru of the Gods
दधातु.....धा 3rd per.sing. (Imper.mood) लोट्, धा--to grant 3U Anit
may you grant

O Devas! may we hear auspicious words with the ears, O Protectors! of rituals, may we see auspicious through the eyes. May we live with healthy limbs and enjoy the life that is alloted, offering praises to Devas. Indra, whose fame is well known, may bless us.The Sun, who is the nourisher, may protect us. Garuda, who has unobstructed movement and Brhaspati, Guru of devas, may bless us.

****

(तत्-पद-प्रधानः श्लोकः)

प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्यलोकान्
भुक्त्वा भोगान्स्थविष्ठान्पुनरपि धिषणोद्भासितान्कामजन्यान् ।
पीत्वा सर्वान्विशेषान्स्वपिति मधुरभुङ्मायया भोजयन्नो
मायासङ्ख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोऽस्मि ॥१॥

●**अन्वयः** (विधिमुखेन वस्तुप्रतिपादनम्)
यत् ब्रह्म, अहं, तत्(ब्रह्म), नतःअस्मि।

*(जाग्रदावस्थायां यत् ब्रह्म), प्रज्ञानांशुप्रतानैः(कूटस्थं ज्ञप्तिरूपं वस्तु-प्रज्ञानं ब्रह्म, तस्य ब्रह्मणः अंशवः रश्मयः चिदाभासाः जीवाः, प्रतानाः विस्ताराः तैः), स्थिरचरनिकरव्यापिभिः(स्थिराः वृक्षादयः, चराः मनुष्यादयः तेषां समूहः निकरः, तं व्यातुं शीलं, तैः), लोकान्(लोक्यमानान् विषयान्), व्याप्य(अनुभूय), स्थविष्ठान्(स्थूलतमान्), भोगान् भुक्त्वा,(तिष्ठति)। (अहं,तत् ब्रह्म, नतःअस्मि।)

*(स्वप्नावस्थायां यत् ब्रह्म), पुनरपि, (प्रज्ञानांशुप्रतानैः), धिषणा(धिषणया बुद्ध्या), उद्भासितान्, कामजन्यान्(कर्म-अविद्यया जातान्), (भोगान् भुक्त्वा), (तिष्ठति, अहं, तत् ब्रह्म, नतःअस्मि।)

*(सुषुप्त्यवस्थायां यत् ब्रह्म), मधुरभुक्(आनन्दभुक्,), सर्वान् विशेषान्(स्थूलान् सूक्ष्मान् च), पीत्वा, (स्वात्मनि अज्ञाते प्रविलाप्य), स्वपिति।(अहं, तत् ब्रह्म, नतःअस्मि।)

*यत् ब्रह्म, परमं, अजं, अमृतं, मायासंख्यातुरीयं(मायया एव चतुर्णां पूरणं तुरीयं), भोजयत्, मायया(जीवाः मायया परिशुद्धे ब्रह्मणि परिकल्पितं), नः(अस्मान्), (वर्तते)।(अहं, तत् ब्रह्म, नतःअस्मि।)

प्रज्ञानांशुप्रतानैः.....(ad.) प्रज्ञानांशुप्रतानम्(N.)instru.pl.
(प्रज्ञानानां अंशुः, प्रज्ञानांशूनां प्रतानं, तैः,ष.ब.व्री.),(प्रज्ञानम्- knowledge प्र-ज्ञा-ल्युट्)
(अंशुः - अंश्-कु),(प्र-तन्-घञ्) तन्- to spread 8U anit
by spreading of the rays of Brahman
स्थिरचरनिकरव्यापिभिः.. (ad.) स्थिरचरनिकरव्यापि (N.)istr.pl.
(स्थिराः च चराः च-स्थिरचराः इत.द्व.स., स्थिरचरानां निकरः-स्थिरचरनिकरः- ष.तत्पु.)
(स्थिरचरनिकरं व्यापुं शीलं अस्य-स्थिरचरनिकरव्यापि)(इनि)
through the group of movable and immovable
व्याप्य.....ind. past participle, (वि-आप्-ल्यप्) आप्-to pervade 5P anit
having experienced
लोकान्.....लोकः (M.)acc.pl., (लोक्यते अनेन) लोक्-to perceive 1A set
objects
भुक्त्वा.....ind. past participle, (भुज्-क्त्वा) भुज्-to enjoy 7P anit
having enjoyed
भोगान्.....भोगः (M.)acc.pl., (भुज्-घञ्) भुज्-to enjoy 7P anit
to the enjoyments
स्थविष्ठान्.....(ad.) स्थविष्ठः(M.)acc.pl., (स्थुल-इष्ठन्) (पा.सू. ६.४.१५६)
grossest
पुनर्.....indeclinable, (पन्-अर्-उत्वम्)
again
अपि.....indeclinable
even
धिषणोद्भासितान्.....(ad.) धिषणोद्भासितः (M.)acc.pl., (धिषणया उद्भासितः - तृ.तत्पु.)
(धृष्-क्यु धिष् आदेशः) धृष्-to conquer 10U setpl., (उत्-भास्-क्त) भास्- to shine 1A set
to be lighted up by the intellect
कामजन्यान्.....(ad.) कामजन्यः (M.)acc.pl., (कामेन जन्यः - तृ.तत्पु.)
that which is produced by desires
पीत्वा.....ind. past participle (पा-क्त्वा) पा-to drink 1P anit
having absorbed
सर्वान्.....(demo.pro.) सर्व (M.)acc.pl.
to all
विशेषान्.....(ad.) विशेषः (M.)acc.pl., (विगतः शेषः यस्मात्-प्रा.स.)
objects
स्वपिति.....स्वप् 3rd.per.sing.pre.ten.लट्, स्वप्- to sleep 2P set (पा.सू.७.२.७६)
he sleeps
मधुरभुक्.....मधुरभुक् (M.)nom.sing., (मधुरं भुङ्क्ते, भुज्-क्विप्)
one who enjoys happiness
भोजयत्.....(ad.) भोजयत् (N.)nom.sing., (भुज्-णिच्-शतृ)
one who makes the other one happy
मायासङ्ख्यातुरीयम्...(ad.) मायासङ्ख्यातुरीयम्(N.)nom.sing., (माया एव सङ्ख्या- क.धा.
मायासङ्ख्यया तुरीयम्- तृ,तत्पु.)
which is as though counted as the Fourth from the point of view of *Maya*

परममृतमजम्.....(ad.) परममृतमजम् (N.)nom.sing.,(परम च अमृतम् च अजम् च -समा.द्व.)
(परम-परं परत्वं माति-क तारा., अमृतम्- न मृतम्- नञ् तत्पु., अजम्- जन्म न विद्यते नञ् ब.व्री.)
which does not have birth and death, which is exalted
बह्म.....ब्रह्मन्(N.)nom.sing., (बृह्--मनिन्) बृह्-to expand 1P
Bramhan
यत्.....(re.pro.) यत् (N.)nom.sing.
which
तत्.....(demo.pro.) तत् (N.)acc.sing.
that
नतः.....(ad.) नतः(M.)nom.sing.(नम्-क्त) नम्-to salute 1P anit
saluted
अस्मि.....अस् 1st.per.sing.pre.ten.लट्, अस्- to be 2P set
I am

My salutation unto that Brahman-which remains in the waking state, having enjoyed the tangible objects, and also experiences worldly objects, through the well spread rays of conciousness, which are (nothing but) 'Jivas', pervading in the immovable-like trees etc. and the movable human beings etc. Again, which remains in the dream state, having experienced objects, which are born out of ignorance, becauce of the projection of the intellect, and, remaining in the deep sleep state, enjoys happiness having resolved gross and subtle objects in the Self and sleeps. My salutation unto that Brahman which is exalted, which does not have birth and death, Turiya, who is Experiencer(because of Maya all Jivas are projected upon Brahman).

****

(त्वम्-पदप्रधानः)

यो विश्वात्मा विधिजविषयान्प्राश्य भोगान्स्थविष्ठा-
न्पश्चाद्बान्यान्स्वमतिविभवाञ्ज्योतिषा स्वेन सूक्ष्मान् ।
सर्वानेतान्पुनरपि शनैः स्वात्मनि स्थापयित्वा
हित्वा सर्वान्विशेषान्विगतगुणगणः पात्वसौ नस्तुरीयः ॥२॥

●**अन्वयः** (निषेधमुखेन वस्तुप्रतिपादनम्)
(असौ तुरीयः, नः अस्मान्, पातु।)

*(जाग्रदावस्थायां यः आत्मा), यः विश्वात्मा, विधिजविषयान्(धर्माधर्माभ्यां, अविद्याकामाभ्यां जाताः विषयाः), स्थविष्ठान्भोगान्(स्थूलतमान्), प्राश्य(साक्षादनुभूय), (तिष्ठति)।

*पश्चात् च, (जाग्रद्धेतुकर्मक्षयानन्तरं), (स्वप्नावस्थायां यः आत्मा), स्वेन ज्योतिषा, स्वमतिविभवान्, अन्यान् सूक्ष्मान् (भोगान्), प्राश्य(साक्षादनुभूय), (तिष्ठति)।

*पुनरपि, (निद्रावस्थायां यः आत्मा), शनैः, सर्वानेतान्(स्थविष्ठान् सूक्ष्मान् च भोगान्), स्वात्मनि(कारणात्मनि) स्थापयित्वा(उपसंहृत्य), (तिष्ठति)।

*(यः प्रत्यगात्मा, तिसृषु अवस्थासु तिष्ठति सः एव), असौ, (निरुपाधिकपरिपूर्णः परिनिष्पन्नः परमात्मा), विगतगुणगणः, तुरीयः, सर्वान्विशेषान्(कार्यकारणरूपान्, ज्ञानप्रभवादेव), हित्वा, नः(अस्मान्), पातु(मोक्षप्रदानेन परिरक्षतु)।

यः..... .(re.pro.) यत्(M.)nom.sing,
who
विश्वात्मा.....(ad.) विश्वात्मन्(M.)nom.sing.,(विश्व एव आत्मा - क.धा.)
one who obtains in the form of Universe

विधिजविषयान्.....(ad.) विधिजविषयः(M.)acc.pl., (विधीयते इति विधिः, धर्माधर्मविधिभ्यां जन्यन्ते विषयाः धर्मः-पूण्यम्, अधर्मः-पापम्)
objects those are born out of *Papa* and *Puṇya*

प्राश्य.....ind. past. participle प्र-अश्-ल्यप् अश्-to eat 9P set
having taken up, enjoyed

स्थविष्ठान्.....(ad.) स्थविष्ठः(M.)acc.pl., (स्थुल-इष्ठन्) (पा.सू. ६.४.१५६)
most grossest

पश्चात्.....indeclinable, (अपर-अति, पश्च भावः)
again

अन्यान्.....(ad.) अन्यः(M.)acc.pl.
other

स्वमतिविभवान्.....(ad.) स्वमतिविभवः (M.)acc.pl., (स्वमत्या विभवाः, प्रसूताः -तृ.तत्पु.)
are born out of ones own intellect

ज्योतिषा.....ज्योतिस् (N.)instr.sing., (द्योतते द्युत्यते वा- द्युत्-इसुन्, दस्य ज-आदेशः)
through light

स्वेन.....(pro.) स्व (M.)instr.sing.
by ones own

सूक्ष्मान्.....(ad.) सूक्ष्मः(M.)acc.pl., (सूक्-मन्, सुक च नेट्)
to subtle

सर्वान्.....(demo.pro.) सर्वः (M.)acc.pl.
to all

एतान्.....(demo.pro.) एतद् (M.)acc.pl.
to these

पुनर्.....indeclinable, (पन्-अर्-उत्वम्)
again

अपि.....indeclinable
even

शनैः.....indeclinable, (शण्-डैस्, पृषो.नुक्)
slowly

स्वात्मनि.....(ad.) स्वात्मन् (M.)loc.sing., (स्वस्य आत्मा- ष.तत्पु.)
in ones own self

स्थापयित्वा.....ind. past part. (स्था- पुँ क्-णिच्-क्त्वा)(पा.सू.७.३.३६) स्था-to stand 1P anit
having brought in

हित्वा..... ind. past participle ,(हा-क्त्वा) (पा.सू.६.४.६६) हा-to abandon 3P anit
having given up

सर्वान्.....(demo.pro.) सर्वः (M.)acc.pl.
to all

विशेषान्.....(ad.) विशेषः (M.)acc.pl.,(विगतः शेषः यस्मात्-प्रादि.ब.व्री.)
objects

विगतगुणगणः.....(ad.) विगतगुणगणः(M.)nom.sing., (गुणानां गणः-ष.तत्पु., विगतः गुणगणः यस्मात्-प्रादि.ब.व्री.)
one from whom all the groups of attributes have gone

पातु..... पा 2nd.per.sing.imp.mood.लोट्, पा-to protect 2P anit
may you protect

असौ.....(demo.pro.) अदस्(M.)nom.sing.
that
नः..... (per.pro.) short form of अस्मान्, अस्मद् acc.pl.
to us
तुरीयः.....(ad.) तुरीयः(M.)nom.sing., (चतुर्-छ, आद्यलोपः)
The fourth

May that Fourth(Turiya) protect us. In the waking state, Atma who is Visvatma remains, one who has identified oneself with the universe, having enjoyed the grossest objects, which are born out of ignorance and desire, and also from *Papa* and *Punya*. Then after the end of the cause of Karma, which keeps him awake, in the dream state one who enjoying subtle objects which are born of ones own intellect and by ones own light remains. Again in the dream state, Atma, slowly having withdrawn all these gross and subtle objects, remains in oneself. That Pratyag-atma, alone remains in the all three states, that limitless Paramatma, is free from all Upadhis. May Turiya which is the fourth, protect us, which is free from all groups of qualities, having given up all objects which are of the nature of cause and effect, because of awakening of knowledge.

आगमाख्यप्रथमप्रकरणम्

हरिः ॐ।

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यात्त्रिकालातीतं तदप्योङ्कार एव ॥१॥

●**अन्वयः** (अभिधानप्रधानश्लोकः)

इदं सर्वं(जगत्), एतदक्षरं, "ओम् "- इति, (सर्वं प्रपञ्चस्य आस्पदम्)। तस्य(ओङ्कारस्य), उपव्याख्यानं(विस्पष्टं कथनं), (ब्रह्मप्रतिपत्ति-उपायत्वात्), (अत्र प्रस्तुतं वेदितव्यम्)। सर्वं(कालत्रयपरिच्छेद्यं), भूतं, भवत्-भविष्यत्-इति ओंकारः एव। यत्, च त्रिकालातीतं(कालत्रय-अपरिच्छेद्यं, कार्याधिगम्यं), तदपि, ओङ्कारः एव।

ॐ .....indeclinable, (अव्-मन्, उठ्, गुणः) अव्- to protect 1P set
Om
इति.....indeclinable, (इ-क्तिन्), इ-to go 2Panit
as represented by, within quotation marks
एतत्.....(demo.pro.) एतत्(N.)nom.sing., (इ-अदि-तुँ क्), इ-to go 2Panit
this
अक्षरम्.....(ad.) अक्षरम् (N.) nom.sing.(न क्षरम् -नञ् तत्पु.)
not subject to destruction
इदम्.....(demo.pro.) इदम्(N.)nom.sing.
this
सर्वम्.....(demo.pro.) सर्वम्(N.)nom.sing., (सृतं अनेन)
everything
तस्य.....(demo.pro.) तत् (N.) gen.sing.
his
उपव्याख्यानम्.....(ad.) उपव्याख्यानम्(N.)nom.sing., (उप-व्या-ख्या-ल्युट्), ख्या-to tell 2P anit
clear explanation
भूतम्.....(ad.) भूतम् (N.)nom.sing., (भू-क्त) भू-to be 1P set
past
भवत्.....(ad.) भवत् (N.)nom.sing., (भू-शतृ)
present

भविष्यत्.....(ad.) भविष्यत् (N.)nom.sing., (भू-स्य-शतृ) (लृटः सत् वा।३.३.१४ पा.सू.)
future
एव.....indeclinable, (इ-वन) इ-to go 2Panit
also
यत्.....(re.pro.) यत् (N.)nom.sing.
which
अन्यत्.....(ad.) अन्यत्(N.)nom.sing.
other
त्रिकालातीतम्.....(ad.) त्रिकालातीतम्(N.)nom.sing., (त्रयः कालाः- द्विगु.स., त्रिकालेन अतीतं-तृ.तत्पु.)
one which is beyond three periods of time
तत्.....(re.pro.) तत् (N.)acc.sing.
that
अपि.....indeclinable
even
ओमकारः.....ॐ syllable
(ॐ-कार V.Pr.1.37)(vajasaneyi Pratisakhya)

The entire universe is this letter, i.e. 'Om', which is the core of all manifestation. Here, clear explanation of 'Om' is being presented, because of the nature of the means of understanding Brahman. Indeed, 'Om' is all, which has circumscribed the past, present and future. And whatever is not bound by time, that also indeed, is 'Om'.

****

सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥२॥

●**अन्वयः** (अभिधेयप्रधानश्लोकः)

सर्वं(भूतं, भवद्, भविष्यत्, त्रिकालातीतं अपि)हि, एतद् ब्रह्म। अयं आत्मा(प्रत्यक्षतया अनुभवन्), ब्रह्म(परोक्षाभिहितं), एव। सः अयं, आत्मा(ओङ्काराभिधेयः), चतुष्पाद्(जाग्रत-स्वप्न-सुषुप्ति-तुरीय-इति पादाः)। (त्रयाणां पादानां विश्वादीनां पूर्वपूर्वविलापेनेन तुरीयस्य प्रतिपत्तिः)। (त्रयाणां पादानां, पद्यते इति अनेन-पादः करणव्युत्पत्तिः)। (चतुर्थपादस्य तुरीयस्य, पद्यते इति पादः कर्मव्युत्पत्तिः)

सर्वम्.....(demo.pro.) सर्वम्(N.)non.sing.,(सृतं अनेन)
everything
हि.....indeclinable
indeed
एतत्.....(demo.pro.) एतत्(N.)nom.sing.,(इ-अदि-तुँ क्), इ-to go 2P
this
ब्रह्म.....ब्रह्मन्(N.)nom.sing.(बृह्-मनिन् नकारस्याकारे ऋतोः रत्वम्) बृह्-to expand 1P
Bramhan
अयम्.....(demo.pro.) इदम् (M.)nom.sing.
this
आत्मा.....आत्मन् (M.)nom.sing.,(अत्-मनिन् उणा.सू.४.१५२) अत्-to go constantly 1Pset
self

Definitely, whatever here is Brahman, which is time and free from time too. Brahman which is indirectly said as, one's own self, which is experienced directly. This self which is named as 'Omkar' has four quarters: waking, dream, sleep and fourth Turiya. Understanding of Turiya takes place by resolving the first three quarters. The first three Padas are derived in instrumental sense. While, fourth Pada is derived in objective sense.

****

जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः॥३॥

●अन्वयः

(आत्मनः चतुष्पादेषु, श्रुतिः, प्रथमं पादं, वर्णयति)। जागरितस्थानः(जागरितं स्थानं अस्य इति)। बहिष्प्रज्ञः(बहिः स्वात्मनि-व्यतिरिक्ते प्रज्ञा यस्य इति)। सप्ताङ्गः(सप्त अङ्गानि यस्य), (१.मूर्धा→सुतेजा, द्युलोकः २.चक्षुः→विश्वरुपः, सूर्यः ३.प्राणः→वर्तात्मा, वायुः ४.मध्यभागः, संदेहः→बहुलः, आकाशः ५.बस्तिः→रयिः, जलं ६.पादौ→पृथिवी ७.मुखम्→आहवनीयः अग्निः)। एकोनविंशतिमुखः(आत्मा-एकोनविंशतिः मुखानि यस्य), (ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि पञ्च प्राणाः, च, मनोबुद्धिचित्तहङ्कारः)। स्थूलभुक्(स्थूलान् विषयान् भुङ्क्ते इति)। वैश्वानरः(सर्वेषां नराणां अनेकधा नयनात् इति वा, विश्वः च असौ नरः)। प्रथमः पादः(सर्व पिण्डात्मा विराड्, तेन समष्टिरूपेण विराजा, विश्वेषामनन्यत्वात्)

जागरितस्थानः.....(ad.) जागरितस्थानः(M.)nom.sing., (जागरितं स्थानं अस्य इति- ब.व्री.)(नपुंसके भावे क्तः।३.३.११४
one whose location is the waking state

बहिष्प्रज्ञः.....(ad.) बहिष्प्रज्ञः(M.)nom.sing., (बहिः प्रज्ञा यस्य -ब.व्री.),बहिस्-indeclinable
one whose consciousness relates to external objects

सप्ताङ्गः.....(ad.) सप्ताङ्गः(M.)nom.sing., (सप्त अङ्गानि यस्य - ब.व्री.)
one who has seven limbs.

एकोनविंशतिमुखः.....(ad.) एकोनविंशतिमुखः(M.)nom.sing., (एकोनविंशतिः मुखानि यस्य-ब.व्री.)
(एक-one, उन-less, विंशति-twenty-एकोनविंशति)
one who has nineteen mouths

स्थूलभुक्.....(ad.) स्थुलभुक् (M.)nom.sing., (स्थुल-भुज्-क्विप्), (स्थुलान् भुङ्क्ते - इति)
one who enjoys gross objects

वैश्वानरः..... छान्दसम्-विश्वानरः, (ad.) वैश्वानरः (M.)nom.sing.
(सर्वेषां नराणां अनेकधा नयनात् इति वा, विश्वः च असौ नरः), (विश्वानर-अण् स्वार्थे)
V*aiśvanara- is the name*

प्रथमः.....(ad.) प्रथम (M.)nom.sing., (प्रथ्-अमच्), प्रथ्-to become famous 1A,10U set
first

पादः.....पादः (M.)nom.sing., (पद्-घञ्)
quarter

Sruti describes the first quarter of Atma who has (as though) four quarters. Atma, one who has location in the waking state, whose cognition is out side, away from ones own self, who has (as though) seven limbs; the head is heaven, the eye is the sun, air is the Prana, middle part is space, water is the bladder, feet are the earth, mouth is Ahavaniya fire, who has nineteen mouths- five sense organs, five organs of action, five Pranas, the mind, intellect, ego, cit. One who enjoys gross objects, who is Vaisvanara because of leading all beings in various directions, one who is the first quarter of an individual, *Viśava*. Atma is of the nature of being non different from that *Virata* who is, Atma of all beings.

****

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः॥४॥

●अन्वयः

(आत्मनः चतुष्पादेषु, श्रुतिः, द्वितीयं पादं, वर्णयति)। स्वप्नस्थानः(स्वप्नः स्थानं अस्य तैजसस्य इति)। अन्तःप्रज्ञः, (इन्द्रियापेक्षान्तःस्थत्वात् मनसस्तद्वासनारूपा च स्वप्ने प्रज्ञा यस्य)। सप्ताङ्गः(सप्त अङ्गानि यस्य)। एकोनविंशतिमुखः (एकोविंशतिः मुखानि यस्य)। प्रविविक्तभुक्(केवलां वासनामात्रां प्रज्ञां भुङ्क्ते इति)। तैजसः(स्वप्ने स्वेन ज्योतिषा सूक्ष्मान् भोज्यत्वात्)। (आत्मा), द्वितीयः पादः।

स्वप्नस्थानः.....(ad.) स्वप्नस्थानः (M.)nom.sing., (स्वप्नः स्थानं अस्य अस्ति इति -ष.ब.व्री.)
dream state is the location of whom
अन्तःप्रज्ञः.....(ad.) अन्तःप्रज्ञः (M.)nom.sing., (अन्तः प्रज्ञा यस्य सः -ष.ब.व्री.)
one whose consciousness relates to internal objects
सप्ताङ्गः.....(ad.) सप्ताङ्गः(M.)nom.sing., (सप्त अङ्गानि यस्य - ष.ब.व्री.)
one who is possessed of seven limbs.
एकोनविंशतिमुखः.....(ad.) एकोनविंशतिमुखः(M.)nom.sing., (एकोविंशतिः मुखानि यस्य- ष.ब.व्री.)
(एक-one, उन-less, विशंति-twenty-एकोनविंशति)
one who is possessed of nineteen mouths
प्रविविक्तभुक्.....(ad.) प्रविविक्तभुक् (M.)nom.sing. (प्रविविक्तान् केवलान् वासनामात्रान् सूक्ष्मान् भोज्यान् भुङ्क्ते-)
one who experiences mere subtle impressions
तैजसः.....(ad.) तैजसः(M.)nom.sing., (तेजस्-अण्)
Taijasa-is the name
द्वितीयः.....(ad.) द्वितीयः(M.)nom.sing.(द्वयोः पूरणम्- द्वि-तीय)
second
पादः.....पादः (M.)nom.sing.(पद्-घञ्)
quarter

Among the four quarters of Atma, *Sruti* describes the second quarter. The dream state is Taijasa, in which state, Atma has its sphere of activity, is the dream. The mind is subtler than the senses and it remains in the form of impressions. One whose consciousness relates to internal organs in dream state called *Antahprajna*. who experiences mere subtle impressions is called Praviviktabhuk, who experiences subtle enjoyments ones own light. Atma who has (as though) second quarter.

****

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्।
सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवाऽऽनन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः॥५॥

- **अन्वय**

(आत्मनः चतुष्पादेषु, श्रुतिः, तृतीयं पादं, वर्णयति।)
यत्र(यस्मिन् स्थाने काले वा), सुप्तः, कञ्चन कामं, न कामयते। यत्र(यस्मिन् स्थाने काले वा), सुप्तः, कञ्चन स्वप्नं न पश्यति, तत् सुषुप्तं स्थानम्। सुषुप्तस्थानः(सुषुप्तं स्थानं अस्य अस्ति इति)। एकीभूतः(मनःस्पन्दितं द्वैतजातं स्थानद्वयप्रविभक्तं सप्रपञ्चं एकीभूतम्)। प्रज्ञानघनः एव, (स्वप्नजाग्रन्मनःस्पन्दनानि प्रज्ञानानि घनीभूतानि, सा इयं अवस्था प्रज्ञानघनः उच्यते। एव शब्दात् प्रज्ञानव्यतिरेकेण नास्ति)। आनन्दमयः(आनन्दप्रायः, विषय-विषयी-आकारस्पदनायासदुःख-अभावात्, मयट्-प्राचुर्यार्थे)। आनन्दभुक्, (अत्यन्त-अनायासरूपा स्थितिः प्राज्ञेन अनुभूयते इति)। चेतोमुखः(जाग्रत्स्वप्नप्रतिबोधचेतः प्रति द्वारीभूतत्वात्)। प्राज्ञः(भुते भविष्ये वर्तमाने सर्वस्मिन् विषये ज्ञातृत्वं अस्य इति प्रकर्षेण आसमन्तात् जानाति इति प्राज्ञः। वा, प्रज्ञप्तिमात्रं अस्य एव असाधारणं रूपं इति प्राज्ञः । (सोऽयं आत्मा), तृतीयः पादः।

यत्र.....indeclinable, (यद्-त्रल्) सप्तम्याः त्रल्।५.३.१०
in which, (time and space)
सुप्तः.....(ad.) सुप्तः (M.)nom.sing., (स्वप्-क्त) स्वप्-to sleep 2P set
the sleeper
कञ्चन.....indeclinable, (कम्-चन्)
anything
कामम्.....कामः (M.)acc.sing., (कम्-घञ्) कम्-to desire 1A set
enjoyable objects

कामयते.....कम् 1st.per.sing.pre.ten. लट्, कम्- to desire 1A set कमेः णिङ्। ३.१.३०
he desires
स्वप्नम्.....स्वप्नः (M.)acc.sing. (स्वप्-नक्) स्वप्-to sleep 2P set
dream
पश्यति.....दृश् 3rd.per.sing. pre.ten.लट्, दृश्- to see 1P anit (पा.सू.७.३.७८)
he/she sees
तत्.....(re.pro.) तत् (N.)acc.sing.
that
सुषुप्तम्.....(ad.) सुषुप्तम्(N.)nom.sing., (सु-स्वप्-क्त) नपुंसके भावे क्तः।३.३.११४
deep sleep
सुषुप्तस्थानः.....(ad.) सुषुप्तस्थानः(M.)nom.sing., (सुषुप्तं स्थानं अस्य अस्ति-ष.ब.व्री.)
sleeping state is the location of whom
एकीभूतः.....(ad.) एकीभूतः(M.)nom.sing., (एक-च्वि-भू-क्त)
undifferentiated
प्रज्ञानघनः.....(ad.) प्रज्ञानघनः(M.)nom.sing. (प्रज्ञानस्य घनः- ष.तत्पु.)
mere consciosness, no second thing
एव.....indeclinable , (इ-वन) इ-to go 2Pset
only
आनन्दमयः.....(ad.) आनन्दमयः (M.)nom.sing.,(आनन्द-मयट्) तत्प्रकृतवचने मयट् ।५.४.२१
predominantly of Ananada
आनन्दभुक्.....(ad.) आनन्दभुक्(M.)nom.sing.,(आनन्दं भुङ्क्ते)(आनन्दः-भुज्-क्विप्)
one who experiences Ananda
चेतोमुखः.....(ad.) चेतोमुखः(M.)nom.sing.,(चेतस् मुखम् यस्य सः - ष.ब.व्री.)
one who is the doorway to the experience
प्राज्ञः.....(ad.) प्राज्ञः(M.)nom.sing., (प्रकर्षेण आसमन्तात् जानाति- उप.तत्पु.)
Prajña- is the name
तृतीयः.....(ad.) तृतीयः (M.)nom.sing., (त्रि-तीय, संप्र.)
third
पादः.....पादः (M.)nom.sing.,(पद्-घञ्)
quarter

That place or time, the sleeper doesn't desire any enjoyable thing, and also sleeper doesn't see any dream, that is the deep sleep state. A sleeping state is a locale for whom is called *Suṣuptsthaana*. The sleeping state, resolves along with the universe, the waking state and dream state which are born out of the modifications of the mind, which has charecteristic of duality and differentiated in to two states are undifferentiated along with all manifestations. The cognitions which are vibrations of waking and dream states are solidified that is called *Prajñanaghana*, the word 'only' indicates nothing other than consciousness. Atma is also called *Ananandamaya*, being *Ananda* predominant and being absence of any effort caused by objects, an experiencer, is called *Anandbhuk* because it is the natural state without any effort. It is called *Cetomukha*, being a doorway towards cognitions of dream and waking state. With reference to all objects, one who has a nature of knowing the present, past and the future, is called *Prajña*. Or one whose form is mere consciousness is called *Pragña*.This Atma is the third quarter.

****

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥६॥

●**अन्वयः**

एषः(स्वरूपावस्थं उपाधिप्राधान्यं अवधूय, चैतन्यं हि), सर्वेश्वरः(आधिदैविकः सर्वस्य इशिता)। एषः(स्वरूपावस्थं उपाधिप्राधान्यं अवधूय, चैतन्यं हि), सर्वज्ञः। एषः(आध्यात्मिकस्वरूपे तिष्ठति चैतन्यं हि), अन्तर्यामी(अन्तः अनुप्रविश्य सर्वेषां भूतानां नियन्ता)। एषः(आध्यात्मिकस्वरूपे तिष्ठति चैतन्यं), हि सर्वस्य योनिः(यथोक्तं सभेदं जगत्प्रसूयते)। (एषः आध्यात्मिकस्वरूपे तिष्ठति चैतन्यं हि), भूतानां प्रभवाप्ययौ (भवतः)।

एषः.....(demo.pro.) एतत्(M..)nom.sing., (इ-अदि-तुँ क्) इ-to go 2P
this

सर्वेश्वरः.....(ad.) सर्वेश्वरः(M.)nom.sing., (सर्वेषां ईश्वरः इति - ष.तत्पु.)
the Lord of all

सर्वज्ञः.....(ad.) सर्वज्ञः (M.)nom.sing., (सर्वं जानाति इति - उप.तत्पु.)
Omniscient

अन्तर्यामी.....(ad.) अन्तर्यामी (M.)nom.sing.,(अन्तः स्थित्वा यमयति)
one who controls remaining inside

योनिः.....योनिः (M.)nom.sing., (यु-नि) यु-to join, 2P set
one who is the source

सर्वस्य.....(Demo.pro.) सर्वम्(N.)gen.sing.,(सृतं अनेन -)
of everything

प्रभवाप्ययौ.....(ad.) प्रभवाप्ययौ (M.)nom.dual, (प्रभवः च अप्ययः च- इत.द्व.)
(प्रकर्षेण अस्मात् भवति-प्रभवः)(प्र-भू-अप्),(अपि यन्ति यस्मिन्- अप्यः)
one who is the place of origin and dissolution

हि.....indeclinable
indeed

भूतानाम्.....(ad.) भूतम् (N.)gen.pl., (भू-क्त) भू-to be 1P set
of beings

This Caitanya who is the *Pragña* in the body, is indeed the Lord and ruler of all cosmic world. This indeed is the knower of everything. One who is the ruler of all beings having entered inside is indeed this *Pragña*. This indeed gives the birth to the world with its diversities. And indeed this is the place of origin and dissolution.

****

नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञं
।अदृष्टमव्यहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं
प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः॥७॥

●**अन्वयः**

(अन्तःप्रज्ञादित्वप्रतिषेधेन जनितं विज्ञानमेव प्रमाणं, विज्ञानप्रमाणसमकाले आत्मनि प्रतिपत्तिः, तत्प्रतिपत्ति एव हि अनर्थप्रपञ्चनिवृतिलक्षणं फलं परिसमाप्तम्। तस्मात् प्रतिषेधविज्ञानप्रमाणव्यापारसमकाले एव आत्मनि अध्यारोपितानि अन्तःप्रज्ञात्वादिनि अनर्थनिवृत्तिः स्यात्)। (तत्त्वविदः), चतुर्थं(तुरीयं), मन्यन्ते। (किं तत् चतुर्थं तुरीयम् ?) नान्तःप्रज्ञं (तैजसप्रतिषेधः)। न बहिष्प्रज्ञं(विश्वप्रतिषेधः)। नोभयतःप्रज्ञं(जाग्रत्स्वप्नयोरन्तरालावस्थाप्रतिषेधः)। न प्रज्ञानघनं(सुषुप्तावस्था-प्रतिषेधः, बीजभाव-अविवेकरूपत्वात्)। न प्रज्ञं(युगपत्सर्वविषयप्रज्ञातृत्वप्रतिषेधः)। न अप्रज्ञं (अचैतन्यप्रतिषेधः स्वात्मनः ज्ञस्वरूपाविशेषेऽपि सत्यत्वं अव्यभिचारात्, इतरेतरव्यभिचारात् अन्तःप्रज्ञादिनां असत्यत्वम्)। (इतरेतरव्यभिचारात् एव दृक्स्वरूपत्वात् च), अदृष्टम्। (अदृष्टत्वात्) अव्यवहार्यम्। (कर्मेन्द्रियैः) अग्राह्यम्। अलक्षणं(स्वतन्त्रानुमानविषयत्वात् अलिङ्गम्)। अचिन्त्यं(अननुमेयत्वात्)। अव्यपदेश्यं(वाच्यार्थतया अनभिगमत्वात्)। एकात्मप्रत्ययसारं(जाग्रदादिस्थानेषु

एकोऽयमात्मा अव्यभिचारी यः प्रत्ययः, तेनप्रत्ययेन अनुसरणीयम्)। प्रपञ्चोपशमं(जाग्रदादिस्थानधर्माभावात्)।(प्रपञ्चोपशमात्) शान्तं, शिवं, अद्वैतं(भेदविकल्परहितं), (इति मन्यन्ते तत्त्वविदः)। स आत्मा स विज्ञेयः।

अन्तःप्रज्ञम्.....(ad.) अन्तःप्रज्ञम् (M.)acc.sing.,(अन्तः प्रज्ञा यस्य सः -ब.व्री.)
conscious of internal world

बहिष्प्रज्ञम्.....(ad.) बहिष्प्रज्ञम् (M.)acc.sing.,(बहिः प्रज्ञा यस्य सः तम्- ब.व्री.)
conscious of external world

उभयतःप्रज्ञम्.....(ad.) उभयतःप्रज्ञम् (M.)acc.sing.,(उभयतः प्रज्ञा यस्य सः, तम् ब.व्री.)
conscious of both the worlds

प्रज्ञानघनम्.....(ad.) प्रज्ञानघनः(M.)acc.sing., (प्रज्ञानस्य घनः- ष.तत्पु.)
mere consciosness, no second thing

प्रज्ञम्.....(ad.) प्रज्ञः(M.)acc.sing., (प्र-ज्ञा-क) ज्ञा-to know 9P
conscious

अप्रज्ञम्.....(ad.) अप्रज्ञः(M.)acc.sing., (न प्रज्ञम् -नञ् त.पु.)
not conscious

अदृष्टम्.....(ad.) अदृष्टः ((M.)acc.sing.,(न दृष्टः -नञ् त.पु.), (दृश्-क्त)
not seen

अव्यवहार्यम्.....(ad.) अव्यवहार्यः ((M.)acc.sing., (व्यवहारः न विद्यते यस्य सः)
beyond empirical dealings

अग्राह्यम्.....(ad.) अग्राह्यः((M.)acc.sing., (न ग्राह्यः, नञ् त.पु .)
not graspable

अलक्षणम्.....(ad.) अलक्षणः ((M.)acc.sing.,(लक्षणः लिङ्गम् न विद्यते नञ् ब.व्री.)
uninferable

अचिन्त्यम्.....(ad.) अचिन्त्यः((M.)acc.sing.,(न चिन्त्यः ,नञ् त.पु.)
not be thaught of

अव्यपदेश्यम्.....(ad.) अव्यपदेश्यः ((M.)acc.sing., (व्यपदेशः न विद्यते यस्य सः, नञ् ब.व्री.)
which cannot be described by direct meanings of words

एकात्मप्रत्ययसारम्.....(ad.) एकात्मप्रत्ययसारः ((M.)acc.sing.
(एकः एव आत्मा-एकात्मा क.धा. ; एकात्मनः प्रत्ययः-एकात्मप्रत्ययः ष.तत्पु.;
एकात्मप्रत्ययः सारः प्रमाणः यस्य सः-एकात्मप्रत्ययसारः ष.ब.व्री.)
for one whose valid meaning is only single pointness of Atma

प्रपञ्चोपशमम्.....(ad.) प्रपञ्चोपशमः((M.)acc.sing., (प्रपञ्चः उपशमः यस्मिन् सः, स.ब.व्री)
one from whom diversity ceases

शान्तम्.....(ad.) शान्तः ((M.)acc.sing., (शम्-क्त)
peaceful

शिवम्.....(ad.) शिवः ((M.)acc.sing., (श्यति पापम्-शो-वन् पृषो.)
auspicious

अद्वैतम्.....(ad.) अद्वैतः ((M.)acc.sing., (द्वैतम् न विद्यते यस्य सः)
one who has no duality

चतुर्थम्.....(ad.) चतुर्थः((M.)acc.sing., (चतुर्णां पूरणः डट् थुक् च)
Fourth

मन्यन्ते.....मन् 3rd.per.pl. pre.ten.लट्, मन्- to consider 4A anit
they consider

सः.....(demo.pro.) तत्(M.)nom.sing.
that

आत्मा.....आत्मन् (M.)nom.sing., (अत्-मनिन् उणा.सू.४.१५२) अत्-to go constantly 1Pset
Self
विज्ञेयः..... (ad.) विज्ञेयः(M.)nom.sing. (वि-ज्ञा-यत्) अचः यत्।३.१.९७ पा.सू.
to be known

A valid knowledge, which is born due to negation of consciousness of the inner states etc., understanding with reference to Atma takes place at same time of valid knowledge. Understanding of that is indeed the ultimate result; characterized by removal of diversity which is harmful. Therefore, at the time, when valid knowledge is born, that time removal of the superimposed inner consciousnss and etc. is taken place, which is harmful. The knowers of truth talk about the fourth quarter, Turiya. What is that? Negation of Taijasa is done by the word, 'na-Antahparjnam'. Visva is neagated by, 'na-Bahisprajnam'. The negation of the state between waking and dream is done by the word, 'na-Ubhayatahprajnam'. Negation of deep sleep is done by the word, not a mass of consciousness, because of being in the seed form. By the word 'na-prajnam' is negation of being aware of all objects simultaneously. By saying *aprajñaanam*, insentience is negated. Other states are mutually rulled out, therefore they are untrue, while uncommon in each state which is the ones own Atma and which is the real form of oneself, being not mutually negated. The truth of it is evident. Unperceived; being not an object of any sensory knowledge. Being unperceived it is beyond empirical dealings. Ungraspable, by the organs of action. Uninferable, does not have any logical ground of inference. Unthinkable, being unmeasurable. It is indescribable by direct meaning of words. Unchanging self, that subsists in the states of waking, dream and deep sleep. All attributes like waking and etc. are ceased in whom. Peaceful(Unchanging), auspicious, non-dual, who is bereft of illusory ideas of difference.That Atma is to be known.

****

सोऽयमात्मऽध्यक्षरमोंकारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ॥८॥

●अन्वयः

(अभिधेयप्रधानः ओङ्कारश्चतुष्पादात्मेति व्याख्यातः)। सः अयं आत्मा अध्यक्षरं(अक्षरं अधिकृत्य अभिधानप्रधानेन ख्यायते)। (किं तदक्षरं?) ओङ्कारः। (सोऽयं ओङ्कारः पादशः प्रविभज्यमानः), अधिमात्रं(मात्रां अधिकृत्य), (वर्तते)। (कथम्?) (ये आत्मनः) पादाः(जागरितस्थानादिः), (ते ओंकारस्य) मात्राः।(काः ताः मात्राः?) अकारः, उकारः, मकारः।

सः.....(demo.pro.) तत्(M.)nom.sing.
that
अयम्.....(demo.pro.) इदम् (M.)nom.sing.
this
आत्मा.....आत्मन् (M.)nom.sing., (अत्-मनिन् उणा.सू.४.१५२) अत्-to go constantly 1Pset
self
अध्यक्षरम्.....indeclinable.(आत्मनि अधिकृत्य अव्य.स.)
in keeping with syllable
ओमकारः.....ॐ syllable,(ॐ-कार V.Pr.1.37)(vajasaneyi Pratisakhya)
Omkar
अधिमात्रम्.....indeclinable, (मात्रां अधिकृत्य-अव्य.स.)
in keeping with letter
पादाः.....पादः (M.)nom.sing., (पद्-घञ्)
quarters
मात्राः.....मात्रा (F.)nom.pl., (मा-त्रन्-टाप्)
letters

Omkar has been described as being possesed of four quarters of Atma by giving predominance to the objects. That very Atma is being described from the standpoint of the syllable. Which is that syllable? That is being stated as; 'Omkar.' That, 'Omkar,' is being divided into quarters from the standpoint of letters. How? Those which are quarters of Atma are the letters of 'Omkar. ' Which are those letters? They are- a, u, and m.

****

जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादिमत्त्वाद्वाऽऽप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद॥९॥

(ॐकारस्य), अकारः प्रथमा मात्रा, जागरितस्थानः वैश्वानरः(प्रथमः पादःभवति)। (केन सामान्यनेन?), (यथा सर्वा वाग्व्याप्ता), अकारेण आप्तेः(व्याप्तिः), (तथा वैश्वानरेण जगत्)। (यथा), आदिमत्त्वं अकारस्य, (तथा वैश्वानरस्य)। (तस्मात् वैश्वानरस्य अकारत्वं सामान्यात्)। यः पुरुषः एवं(यथोक्तं एकत्वं) वेद, सः सर्वान् कामान् आप्नोति, ह वै (सतां मध्ये) आदिः भवति।

जागरितस्थानः.....(ad.) जागरितस्थानः(M.)nom.sing., (जागरितं स्थानं अस्य इति- ब.व्री.)
one whose location is the waking state

वैश्वानरः.....छान्दसम्-विश्वानरः, (ad.) वैश्वानरः (M.)nom.sing.
(सर्वेषां नराणां अनेकधा नयनात् इति वा, विश्वः च असौ नरः),(विश्वानरः-अण स्वार्थे)
V*aiśvanara*

अकारः.....अ 'a' syllable, (अ-कार V.Pr.1.37)(vajasaneyi Pratisakhya)
letter 'a'

प्रथमा.....(ad.) प्रथमा (F.) nom.sing., (प्रथ्-अमच्)
first

मात्रा.....मात्रा (F.) nom.sing., (मा-त्रन्-टाप्) मा-to measure 3A anit
letter

आप्तेः.....आप्तिः(F.) abl.sing., (आप्-क्तिन्) आप्-to pervade 5Panit
because of pervading

आदिमत्त्वात्.....(ad.) आदिमत्त्वम् (N.)abl.sing.
(आदिः यस्य विद्यते सः आदिमत्,तस्य भावः आदिमत्त्वम्,तस्मात्)
because of the nature of being first

वा.....indeclinable, (वा-क्विप्) वा- to blow 2P,1Panit
or, otherwise

आप्नोति.....आप् 3rd.per.sing.pre.ten. लट्, आप्- to get,to obtain 5P anit
he/she attains

ह.....indeclinable,(हा-ड)
indeed

वै..... indeclinable,(वा-डै)
indeed

सर्वान्.....(demo.pro.) सर्वम्(N.)acc.pl., (सृतं अनेन)
to all

कामान्.....कामः (M.)acc.pl.,(कम्-घञ्) कम्-to desire 1A set
to enjoyable objects

आदिः.....(ad.) आदिः (M.)nom.sing., (आ-दा-कि), दा- to give 3U anit
first

च.....indeclinable, (चण्(चि)-ड)
and

भवति.....भू 3rd.per.sing.pre.ten.लट्, भू- to be 1P set
he/she becomes
यः.....(demo.pro.) यत्(M.)nom.sing.
one who
एवम्.....indeclinable,(इ-वन) इ-to go 2P
in this manner
वेद.....विद् 1st.per.sing. pre.ten. लट्,विद्-to know 2P set
one who knows

The first letter of Omkar is the first quarter of the waking state. Due to which similarity? All speech is pervaded by letter "a", just as, the universe is pervaded by Vaisvanara. The letter 'a' is first, similarly Vaisvanara too. Therefore similarity of Vaisvanar and letter 'a' is evident. A person who knows the similarity, what was talked about, he gains all desirable objects and becomes the foremost among the great people.

****

स्वप्नस्थानस्तैजस ऊकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसंततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद॥१०॥

●अन्वयः

(ॐकारस्य), उकारः द्वितीया मात्रा, स्वप्न्स्थानः तैजसः(द्वितीयः पादः भवति)।(केन सामान्यनेन?), उत्कर्षात्(उकारः अकारात्
उत्कर्षः, तथा तैजसः विश्वात् उत्कर्षः)। उभयत्वात्(उकारः अकारमकारयोः मध्यस्थः तथा तैजसोऽपि विश्वप्राज्ञयोः मध्ये एव)।यः पुरुषः, एवं(यथोक्तं एकत्वं) वेद, सः ज्ञानसंततिं उत्कर्षति(वर्धयति), सः समानः(मित्रपक्षस्येव शत्रुपक्षाणां अपि अप्रद्वेष्यः) भवति, अस्य कुले अब्रह्मविद् न भवति।

स्वप्नस्थानः.....(ad.) स्वप्नस्थानः (M.) nom.sing., (स्वप्नः स्थानं अस्य अस्ति इति ब.व्री.)
one whose location is the dream state
तैजसः.....(ad.) तैजसः(M.) nom.sing., (तेजस्-अण्)
Taijasa
द्वितीया.....(ad.) द्वितीया(F.) nom.sing., (द्वयोः पूरणम्-द्वि-तीय)
second
उकारः.....'उ' 'u' syllable, (u-कार V.Pr.1.37)(vajasaneyi Pratisakhya)
letter 'u'
मात्राः.....मात्रा (F.)nom.pl., (मा-त्रन्-टाप्)
letters
उत्कर्षात्.....उत्कर्षः (M.)abl.sing., (उद्-कृष्-घञ्) कृष्-to draw 1P anit
more eminent,superior
उभयत्वात्.....उभयत्वम् (N.)abl.sing., (उभ्-अयट् उभय, तस्य भावः उभयत्वम्) उभ्-to fill with 4Pset
because of the nature of being intermediate
उत्कर्षति.....उत्-कर्ष् 3rd.per.sing.pre.ten.लट्, उद्-कर्ष्- to pull out 1P anit
he/she increases
ज्ञानसन्ततिम्.....(ad.) ज्ञानसन्ततिः(F.)acc.sing., (ज्ञानस्य सन्ततिः- ष.तत्पु.), (ज्ञा-ल्युट्), (सम्-तन्-क्तिन्)
increasing of knowledge
समानः.....(ad.) समानः(M.)nom.sing., (सम्-अन्-अण्) अन्-to live 2P set
equal to all

भवति.....भू 3rd.per.sing.pre.ten.लट्, भू- to be 1P set
he/she becomes
अस्य.....(demo.pro.) इदम्(M.)gen.sing., (इन्द्-कमिन्) इन्द्- to have a great power 1Pset
of this
अब्रह्मवित्.....(ad.) अब्रह्मवित् (M.) nom.sing., (ब्रह्म वेत्ति-उपपद तत्पु., न ब्रह्मविद् -नञ् तत्पु.)
one who does not know Brahman
कुले.....कुलम् (N.)loc.sing., (कुल-क) कुल-to accumulate 1P set
in the family
यः.....(demo.pro.) यत्(M.)nom.sing.
one who
एवम्.....indeclinable, (इ-वन) इ-to go 2Panit
in this manner
वेद.....विद् 1st.per.sing. pre.ten. लट्, विद्- to know 2P set
one who knows

The second letter of Omkar is the second quarter, is the dream state. Due to which similarity? Both are similar because of being excellent. The letter 'u' is more superior than the letter 'a', similarly Taijas is better than Visva, also because of being intermediate. The letter 'u' is between the letter 'a' and 'm', so too Taijas is intermediate between Visva and Prajna. The person who knows the oneness in this manner, increases the knowledge(in the terms of self growth), he remains the same-he does not become an object of envy to his enemies or his friends. In his family lineage, nobody is born, who is not a knower of Bramhan.

****

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद॥११॥

●अन्वयः

(ॐकारस्य) मकारः, तृतीया मात्रा, सुषुप्तस्थानः प्राज्ञः(तृतीयः पादः भवति)। (केन सामान्यनेन?)। मितेः(मानं मीयेते, अकार-उकारौ मकारे प्रविश्य पुनः प्रयोगे निर्गच्छतः, विश्वतैजसौ प्रलयोत्पत्त्योः)। अपीतेः वा,(ओंकारोच्चारणे अन्त्ये अक्षरे एकीभूतौ इव अकारोकारौ, तथा विश्वतैजसौ सुषुप्तिकाले प्राज्ञे एकीभूतौ)। यः (पुरुषः), एवं(यथोक्तं एकत्वं) वेद, ह वै सः मिनोति (जगद्याथात्म्यं जानाति), सः अपीतिः च(जगत्कारणात्मा भवति)।

सुषुप्तस्थान:.....(ad) सुषुप्तस्थानः (M.)nom.sing., (सुषुप्तं स्थानं अस्य अस्ति-)
one whose location is the sleeping state
प्राज्ञः.....(ad.) प्राज्ञः(M.)nom.sing., (प्रकर्षेण आसमन्तात् जानाति- उप.तत्पु.)
Prajña
मकारः.....'म' 'm' syllable, (u-कार V.Pr.1.37) (vajasaneyi Pratisakhya)
letter 'm'
तृतीया.....(ad.) तृतीयः (M.)nom.sing., (त्रि-तीय, संप्र.)
third
मात्रा.....मात्रा (F.)nom.sing., (मा-त्रन्-टाप्)
letter
मितेः.....मितिः (F.)abl.sing., (मि-क्तिन्) मि-to measure 5U anit
because of measuring

अपीतेः.....अपीतिः (F.)abl.sing., (अपि-इ-क्तिन्) इ-*to* go 2P anit
because of absorption
वा.....indeclinable, (वा-क्विप्) वा- to blow 2P,1Panit
or, otherwise
मिनोति.....मि 3rd.per.sing.pre.ten. लट्, मि-to mesure 5U anit
one who knows/measures
यः .....(demo.pro.) यत्(M.)nom.sing.
one who
एवम्.....indeclinable, (इ-वन) इ-to go 2P
in this manner
वेद.....विद् 1st.per.sing. pre.ten. लट्, विद्-to know 2P set
one who knows

The third letter of Omkar is the third quarter, the sleeping state. Due to which similarity? Due to measuring of the letters. The letter 'a' and 'u' entered in to letter 'm' and come out at the time of pronunciation. Same way too, Visva and Taijas go in dissolution -in the deep sleep and at time of waking-come out from the sleep. Due to absorption, at the time of pronunciation 'om', the letter 'a' and 'u' are merged in the letter 'm', in the same manner Visva and Taijasa are merged into Prajna at the time of sleep. One who knows the oneness of letters and quarters, he knows the reality of the universe, and also he absorbs-the self in the state as the cause of the universe.

****

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद ॥१२॥

अमात्रः(मात्रा अस्य न विद्यते), ॐकारः चतुर्थः(तुरीयः आत्मा), अव्यवहार्यः(केवलः, अभिधानाभिधेयरूपयोः क्षीणत्वात्), प्रपञ्चोपशमः(कार्यकारणप्रपञ्चः उपशमः यस्मिन्), शिवः(सर्वप्रपञ्चोपशमात्), अद्वैतः(सर्वकल्पनाधिष्ठानत्वात्), एवं (यथोक्तविज्ञानवता पुरुषेण), (त्रिमात्रः ज्ञातः)ओंकारः, (त्रिपादः)आत्मा एव। यः(परमार्थदर्शी), एवं(पारमार्थिकमात्मानं), वेद, सः(ब्रह्मवित्), (तृतीयं अज्ञानरुपं बीजभावं दग्ध्वा), स्वेनैव आत्मना आत्मानं संविशति जानाति (न पुनः जायते, तुरीयस्य अबीजत्वात्)।

अमात्रः.....(*ad*.) अमात्रः(M.)nom.sing., (मात्रा न विद्यते यस्य सः -नञ् ब.व्री.)
that which has no matra,part
चतुर्थः.....(*ad*.) चतुर्थः ((M.)nom.sing., (चतुर्णां पूरणः डट् थुक् च)
Fourth
अव्यवहार्यः.....(ad.) अव्यवहार्यः ((M.) nom.sing., (व्यवहारः न विद्यते यस्य सः)
beyond empirical dealings
प्रपञ्चोपशमः.....(ad.) प्रपञ्चोपशमः((M.) nom.sing., (प्रपञ्चः उपशमः यस्मिन् सः)
one from whom diversity is ceased
शिवः.....(ad.) शिवः ((M.) nom.sing., (श्यति पापम्-शो-वन् पृषो.)
auspicious
अद्वैतः.....(ad.) अद्वैतः ((M.) nom.sing., (द्वैतम् न विद्यते यस्य सः)
for one who has no duality, nondual
आत्मा.....आत्मन् (M.)nom.sing., (अत्-मनिन् उणा.सू.४.१५२), अत्-to go constantly 1Pset
self
ओमकारः.....ॐ syllable,(ॐ-कार V.Pr.1.37)(vajasaneyi Pratisakhya)
संविशति.....सं-विश् 3rd.per.sing.pre.ten.लट्, सं-विश्-to enter 6P anit
he/she enters, contextually knows

आत्मना.....आत्मन्(M.)intr.sing. (इत्थं भूते तृतीया),
in the form of ones own Self
आत्मानम्.....आत्मन् (M.)acc.sing.
into Self
यः .....(demo.pro.) यत्(M.)nom.sing.
one who
एवम्.....indeclinable, (इ-वन) इ-to go 2P anit
in this manner
वेद.....विद् 1st.per.sing. pre.ten. लट्, विद्-to know 2P set
one who knows

Which has no part/matra, 'Omkar' is the Fourth Turiya Atma, one which is beyond empirical transaction, all names and nameables are being resolved. In which, the cessation of all manifestations in the terms of cause and effect do exsist. It is Advaita, being the source of all imaginations. The person who knows in this manner, that the three matras of Omkar are indeed three quarters of Atma, one who knows this real nature of Atma, that knower of Brahman, having burnt the seed of ignorance knows Atma through ones own self. Being Brahman, he/she is not born again, because of the nature of Turiya is, not having any seed.

**** **** **** **** **** **** **** **** ****